# बिल्वाष्टकं

त्रिदळं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधं
त्रिजन्म पाप संहारं एक बिल्वं शिवार्पणम 1

त्रिशाखैः बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैश्शुभैः
शिव पूजां करिष्यामि एक बिल्वं शिवार्पणम 2

अखंड बिल्वपत्रेण पूजिते नंदिकेश्वरे
शुद्ध्यंति सर्व पापेभ्यो एक बिल्वं शिवार्पणम 3

सालिग्राम शिलामेकां विप्राणां जातुचार्पयेत
सोम यज्ञ महा पुण्यं एक बिल्वं शिवार्पणम 4

दंति कोटि सहस्राणि वाजपेय शतानि च
कोटि कन्या महा दानं एक बिल्वं शिवार्पणम 5

लक्ष्म्यातनुत उत्पन्नं महादेवस्य च प्रियं
बिल्व वृक्षं प्रयच्छामि एक बिल्वं शिवार्पणं 6

दर्शनं बिल्व वृक्षस्य स्पर्शनं पाप नाशनं
अघोर पाप संहारं एक बिल्वं शिवार्पणं 7

काशी क्षेत्र निवासं च काल भैरव दर्शनं
प्रयाग माधवं दृष्ट्वा एक बिल्वं शिवार्पणम 8

मूलतो ब्रह्म रूपाय मध्यतो विष्णु रूपिणे
अग्रतश्शिव रूपाय एक बिल्वं शिवार्पणम 9

बिल्वाष्टकमिदं पुण्यं यः पठेच्छिव सन्निधौ
सर्व पाप विनिर्मुक्तः शिव लोकमवाप्नुयात 10